भक्त मनोरथ सिद्धिप्रदं गणेश स्तोत्रम्

स्कन्द उवाच

नमस्ते योगरूपाय संप्रज्ञातशरीरिणे ।
असंप्रज्ञातमूर्ध्ने ते तयोर्योगमयाय च ॥ 1 ॥

वामाङ्ग भ्रान्तिरूपा ते सिद्धिः सर्वप्रदा प्रभो ।
भ्रान्तिधारकरूपा वै बुद्धिस्ते दक्षिणाङ्गके ॥ 2 ॥

मायासिद्धिस्तथा देवो मायिको बुद्धिसंज्ञितः ।
तयोर्योगे गणेशान त्वं स्थितोऽसि नमोऽस्तु ते ॥ 3 ॥

जगद्रूपो गकारश्च णकारो ब्रह्मवाचकः ।
तयोर्योगे हि गणपो नाम तुभ्यं नमो नमः ॥ 4 ॥

चतुर्विधं जगत्सर्वं ब्रह्म तत्र तदात्मकम् ।
हस्ताश्चत्वार एवं ते चतुर्भुज नमोऽस्तु ते ॥ 5 ॥

स्वयंवेद्यं च यद्ब्रह्म तत्र खेलकरो भवान् ।
तेन स्वानन्दवासी त्वं स्वानन्दपतये नमः ॥ 6 ॥

द्वन्द्वं चरसि भक्तानां तेषां हृदि समास्थितः ।
चौरवत्तेन तेऽभूद्वै मूषको वाहनं प्रभो ॥ 7 ॥

जगति ब्रह्मणि स्थित्वा भोगान्भुंक्षि स्वयोगगः ।
जगद्भिः ब्रह्मभिस्तेन चेष्टितं ज्ञायते न च ॥ 8 ॥

चौरवद्भोगकर्ता त्वं तेन ते वाहनं परम् ।
मूषको मूषकारूढो हेरंबाय नमो नमः ॥ 9 ॥

किं स्तौमि त्वां गणाधीश योगशान्तिधरं परम् ।
वेदादयो ययुः शान्तिमतो देवं नमाम्यहम् ॥ 10 ॥

इति स्तोत्रं समाकर्ण्य गणेशः तमुवाच ह ।
वरं वृणु महाभाग दास्यामि दुर्लभं ह्यपि ॥ 11 ॥

त्वया कृतमिदं स्तोत्रं योगशान्तिप्रदं भवेत् ।
मयि भक्तिकरं स्कन्द सर्वसिद्धिप्रदं तथा ॥ 12 ॥

यं यमिच्छसि तं तं वै दास्यामि स्तोत्रयन्त्रितः ।
पठते श्रुण्वते नित्यं कार्तिकेय विशेषतः ॥ 13 ॥

॥ इति श्री मुद्गल पुराणन्तर्वर्ति गणेश स्तोत्रं संपूर्णम् ॥